"कतमोऽध्यर्द्ध" ? इति पुनः शाकल्यप्रश्ने, "योऽयं पवत" इत्युक्तं तत्र पवत इत्यनेन वायुरुक्तः । "तदाहुर्यदयमेकएव पवते अथ कथमध्यर्द्ध" ? इति । वायोरेकत्वेन अध्यर्द्धशब्दार्थस्य सार्द्धत्वस्यासम्भवे पुनराक्षिप्ते "यदस्मिन् इदं सर्वमध्यार्ध्नोत् तेनाध्यर्द्ध" इत्युत्तरम् तेन अधिकर्द्धिहेतुत्वात् वायोरध्यर्द्धत्वात् तथात्वम् अधि+ऋध–लङ् अध्यार्ध्नोत् ।

**अध्यवसाय** पु० अधि+अव–सो–घञ् । इदमेवमेवेति विषयपरिच्छेदे निश्चये । स चात्मधर्म्म इति नैयायिकाः बुद्धिधर्म्म इति सांख्यादयः । "उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽयमध्यवसाय इति वृत्तिरिति चाख्यायते" इति सांख्यतत्त्वकौमुदीपरिभाषितलक्षणः, "कर्त्तव्यमिति योऽयं निश्चयः चित्सान्निध्यात् प्राप्तचैतन्याया बुद्धेः परिणामः सोऽयमध्यवसाय" इत्युक्तलक्षणो वा निश्चयः । "प्रतिविषयाध्यवसायो दृष्टमिति सां०का० । उत्साहे च । उत्साहस्य कर्म्मसु सुकरत्वेन ज्ञानात् उद्यमभेदः ।

**अध्यवसायित** त्रि० अध्यवसायो जातोऽस्य तारा० इतच् । जाताध्यवसाये । [निश्चयवति च ।

**अध्यवसायिन्** त्रि० अधि+अव–सो–णिनि । उत्साहान्विते

**अध्यवहनन** न० अधि–उपरि अवहननम् । पूर्व्वावघातेन वितुषीकरणेऽपि पुनरवघाते । तेन च "व्रीहीनवहन्तीति" नियमपालनम् ।

**अध्यशन** न० अधिकमशनम् । "साजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते" इति सुश्रुतोक्ते अजीर्णेऽपि अधिकाशने । "यथोक्तैः प्रकोपणैर्विरुद्धाध्यशनस्त्रीप्रसङ्गेत्यादि" सुश्रुतम् ।

**अध्यस्त** त्रि० अधि+अस–कर्म्मणि क्त । कृताध्यासे आरोपिते, अध्यासशब्दे वक्ष्यते तद्विषये मिथ्याभूते पदार्थे । शुक्तौ रजतमध्यस्तम् ब्रह्मणि जगदध्यस्तमित्यादि ।

**अध्यात्म** अव्य० आत्मानं देहमिन्द्रियादिकं क्षेत्रज्ञं ब्रह्म वाऽधिकृत्य टच् समा० । देहमिन्द्रियादिकम् आत्मानं ब्रह्म वाधिकृत्येत्यर्थे । तत्र देहाधिकारे "अध्यात्ममिति" वृ०उ० अधिदेवताशब्दे दृश्यम्, तत्र प्राणाद्यधिकारेण अन्तर्यामित्वमुक्तम् । क्षेत्रज्ञाधिकारे "अध्यात्मयोगाधिगमेनेति" । "अध्यात्मरतिरासीनो निराकाङ्क्षो निरामिष" इति मनुः । "आत्मानं ब्रह्माधिकृत्येति" कुल्लू० । "जरामरणमोक्षाय मामाश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलमिति" गीता । "ते जनाः परं ब्रह्म कृत्स्नमध्यात्मञ्च विदुः ये तत् प्राप्तव्यं देहादिव्यतिरिक्तं शुद्धमात्मानञ्च जानन्तीति" श्रीध० । "अक्षरं परमं ब्रह्म स्वभावोऽध्यात्ममुच्यते" इति गीता । "स्वस्यैव ब्रह्मण एवांशतया जीवस्वरूपेण भावोभवनं स एवात्मानं देहमधिकृत्य भोक्तृत्वेन वर्त्तमानोऽध्यात्मशब्देनोच्यते" इति श्रीधरः । तेन देहाधिकारेण भोक्तृतया ब्रह्मणोऽंशस्य जीवभवनेऽस्य पारिभाषिकत्वं सूचितम् "अध्यात्मविद्या विद्यानां वादः प्रवदतामहमिति" गीता सा च विद्या न्याय वैशेषिकमते देहभिन्नत्वेन, सांख्यादिमते प्रकृतिभिन्नत्वेन आत्मनः स्वरूपादिप्रतिपादिका । वेदान्तिमते तु ब्रह्माभिन्नत्वेनेति भेदः । सर्व्वेषां मतेऽध्यात्मतत्त्वज्ञानरूपत्वात्तस्या अध्यात्मविद्यात्वम् । तत्र नैयायिकवैशेषिकमते आत्मा द्विविधः जीवात्मा परमात्मा च । तत्र जीवात्मानमधिकृत्य उदयनाचार्य्येण आत्मतत्त्वविवेकरूपप्रकरणं, परमात्मानमधिकृत्य च कुसुमाञ्जलिनामकमपरं प्रकरणं निरमायि । सांख्ये ईश्वरानभ्युपगमेन पुरुषस्य प्रकृत्यादिभ्यो विवेकज्ञानाय षड़ध्यायीरूपं कपिलमुनिना, तन्मूलकमीश्वरकृष्णेन च सांख्यकारिकाः सप्ततिः निरमायिषत, वाचस्पतिना च ता व्याख्याताः ततएव विस्तरोऽवसेयः । पातञ्जले तु जीवानामीश्वरस्य च भेदस्वीकारेऽपि ईश्वरप्रणिधानेन पुरुषस्य प्रकृत्यादिभ्यो भेदसाक्षात्कार इति भेदः । अधिकं तत्तच्छब्दे वक्ष्यते । "मयि कर्म्माणि सर्व्वाणि संन्यस्याध्यात्मचेतसेति" गीता । "अध्यात्मचेतसा विवेकबुद्ध्या" । अध्यात्मं जातः ठञ् । अनुशतिका० द्विपदवृद्धिः । आध्यात्मिकं दैहिके मानसिके च दुःखादौ त्रि० ।

**अध्यात्मदृश्** त्रि० अध्यात्मं पश्यति दृश–क्विन् । आत्मज्ञे विषयत्यागेनात्ममात्रदर्शके ।

**अध्यात्मयोग** पु० आत्मानं क्षेत्रज्ञमधिकृत्य योगः । विषयेभ्यः प्रतिसंहृत्य चेतसआत्मनि समवधाने । "अध्यात्मयोगाधिगमेनेति" ।

**अध्यात्मरामायण** न० आत्मानमधिकृत्य कृतं रामस्यायनं यत्र । वाल्मीकिप्रणीते अध्यात्मज्ञानप्रतिपादके प्रसङ्गतो रामचरितज्ञापके स्वनामख्याते ग्रन्थभेदे ।

**अध्यात्मशास्त्र** न० अध्यात्म प्रतिपादकं शास्त्रम् । आत्मस्वरूपादि प्रतिपादकग्रन्थे ।

**अध्यापक** पु० अध्यापयति अधि+इङ् णिच्–ण्वुल् । अध्ययनकारयितरि, उपाध्याये च । "भृतकाध्यापकोयस्तु भृतकाध्यापितस्तथेति" मनुः । अस्य अकान्तत्वेऽपि याजकादिगणे पाठात् षष्ठीसमासः तेन वेदाध्यापकः न्याया-